# ३. नष्टः पिष्टघटः

कस्मिँश्चित् नगरे कश्चन दरिद्रः ब्राह्मणः वसति स्म। सः भिक्षाटनेन जीवनं करोति स्म। कदाचित् सः पिष्टेन पूर्णम् एकं घटं प्राप्तवान्। तं घटं नागदन्ते अवलम्ब्य तस्य अधः उपविश्य सः एकदृष्ट्या घटमेव पश्यति स्म।

एकदा रात्रौ सः चिन्तितवान् - 'यदि देशे दुर्भिक्षः भवेत् तर्हि एतस्य शतरूप्यकाणां मूल्यं भवेत्। तदा अहम् एतत् विक्रीय तेन धनेन अजद्वयं क्रेष्यामि। कालान्तरे तेन अजसमूहः एव भविष्यति। अनन्तरम् अजसमूहं विक्रीय धेनूः क्रेष्यामि। अनन्तरं ताः विक्रीय महिषीः, ताः विक्रीय अश्वान् च क्रेष्यामि। तान् अपि विक्रीय यथेष्टं धनं सम्पादयिष्यामि। बृहत् गृहं निर्मापयिष्यामि। तदा कश्चित् ब्राह्मणः आगत्य रूपवतीं स्वकन्यां मह्यं दास्यति। अनन्तरं मम पुत्रः जनिष्यति। देवशर्मा इति तस्य नामकरणं करिष्यामि। यदा सः जानुभ्यां चलितुं समर्थः भविष्यति तदा अहम् अश्वशालायां पुस्तकं पठिष्यामि। तदा देवशर्मा जानुभ्यां चलन् मम समीपम् आगन्तुम् उद्युक्तः भविष्यति। तदा तं बालं ग्रहीतुं तस्य मातरम् आज्ञापयिष्यामि। यदा सा मम वचनं न श्रोष्यति तदा अहं कोपेन पादप्रहारेण तां दण्डयिष्यामि' इति एवं चिन्तयन् सः पादप्रहारं कृतवान् एव। पिष्टेन पूर्णः घटः पतितः, भग्नः च।





अनागतवतीं चिन्ताम् असम्भाव्यां करोति यः।
स एव पाण्डुरः शेते देवशर्मपिता यथा॥